स्वस्तिकः सर्व्वतोभद्रो नन्द्यावर्त्तादयोऽपि च ।
विच्छन्दकः प्रभेदा हि भवन्तीश्वरसद्मनाम् ॥”
इत्यमरः । २ । २ । १० ॥

राजसभा, स्त्री, राज्ञः सभा । (“सभा राजामनुष्यपूर्व्वा ।” २ । ४ । २३ । इत्यत्र राजपर्य्यायस्यैव ग्रहणात् न क्लीवत्वम् ।) नृपतिसमाजः । इत्यमरः । ३ । ५ । ६ ॥ (वाचस्पत्ये नपुंसकलिङ्गतोक्तिस्तु प्रामादिकी ॥)

राजसर्पः, पुं, (सर्पाणां राजा । राजदन्तादित्वात् परनिपातः ।) सर्पविशेषः । तत्पर्य्यायः । भुजङ्गभोजी २ । इति हेमचन्द्रः । ४ । ३७० ॥

राजसर्षपः, पुं, (सर्षपाणां राजा श्रेष्ठत्वात् । परनिपातः ।) सर्षपविशेषः । राजसर्षा इति भाषा ॥ राइ इति केचित् ॥ तत्पर्य्यायः । क्षुधिका २ राजिका ३ स्तुरी ४ सुष्ठकः ५ । सुष्ठक इत्यत्र यष्टक इति वा पाठः । इति रत्नमाला ॥ क्षवः ६ क्षुताभिजननः ७ । क्षुताभिजनन इत्यत्र क्षुधाभिजनन इति वा पाठः । इति हेमचन्द्रः ॥ कृष्णा ८ तीक्ष्णफला ९ राजी १० कृष्णसर्षपाख्या ११ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । वातशूलगुल्मकण्डुकुष्ठव्रणनाशित्वम् । पित्तदाहप्रदत्वञ्च । इति राजनिर्घण्टः ॥ (चतुर्व्विंशतित्रसरेणुपरिमित-परिमाणविशेषः । यथा, मनुः । ८ । १३३ ।
“त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणतः ।
ता राजसर्षपस्तिस्रस्ते त्रयो गौरसर्षपः ॥”
“त्रसेत्यादि । अष्टौ त्रसरेणवो लिक्षैका परिमाणेन ज्ञेया तास्तिस्रो लिक्षा राजसर्षपो ज्ञेयः । ते राजसर्षपास्त्रयो गौरसर्षपो ज्ञेयः ॥” इति तट्टीकायां कुल्लूकः ॥)

राजसायुज्यं, क्ली, (राज्ञः सायुज्यम् ।) राजत्वम् ।
“स्याद्ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यपि ।
देवभूयादिकं तद्वत्————————— ॥”
इत्यमरदर्शनात् ॥

राजसारसः, पुं, (राज्ञः सारस इव । राजः शोभाशाली सारस इव इति वा ।) मयूरः । इति शब्दमाला ॥

राजसी, स्त्री, (रजस इयमिति । रजस् + अण् । ङीप् ।) दुर्गा । इति शब्दरत्नावली ॥ रजोगुणसम्बन्धिनी च ॥ (यथा, गीतायाम् ।
“यया धर्म्ममधर्म्मञ्च कार्य्यञ्चाकार्य्यमेव च ।
अयथावत् प्रजानाति बुद्धिः सा पार्थ राजसी ॥”)

राजसूयः, पुं, (“राज्ञा लतात्मकः सोमः सूयते ऽत्र ।” इत्यमरटीका ॥ सु + अधिकरणे क्यप् । “राज्ञा सोतव्यः राज्ञा वा इह सूयते ।” इति काशिका । “राजसूयसूर्य्येति ।” ३ । १ । ११४ । इति निपातनात् दीर्घः ।) राजकर्त्तव्ययज्ञविशेषः । तत्पर्य्यायः । नृपाध्वरः २ क्रतुराजः ३ क्रतूत्तमः ४ । इति शब्दरत्नावली ॥ (अमरमते क्लीवलिङ्गोऽयम् । ३ । ५ । ३९ ॥ यथा, महाभारते । १ । १५७ । १६ ।
“यक्ष्यन्ति च नरव्याघ्रा निर्ज्जित्य पृथिवीमिमाम् ।
राजसूयाश्वमेधाद्यैः क्रतुभिर्भूरिदक्षिणैः ॥”
राजसूयमन्त्रादिकं वाजसनेयसंहितायाम् ९ अध्यायस्य ३५ कण्डिकामारभ्य १० अध्यायस्य ३० कण्डिकापर्य्यन्तं द्रष्टव्यम् ॥ युधिष्ठिरस्य राजसूययज्ञविवरणन्तु महाभारते सभापर्व्वणि विशेषतो द्रष्टव्यम् ॥)

राजस्कन्धः, पुं, (राजः शोभाशाली स्कन्धो यस्य ।) घोटकः । इति त्रिकाण्डशेषः ॥

राजस्वं, पुं क्ली, (राज्ञे देयं स्वं धनम् ।) राजधनम् । राजकरः । इति लोकप्रसिद्धम् ॥

राजस्वर्णः, पुं, (स्वर्णानां धुस्तूराणां राजा । राजदन्तादित्वात् परनिपातः ।) राजधुस्तूरकः । इति राजनिर्घण्टः ॥

राजहंसः, पुं, (हंसानां राजा श्रेष्ठत्वात् । राजदन्तादित्वात् परनिपातः ।) चञ्चुचरणलोहितश्वेतवर्णहंसः । इत्यमरः । २ । ५ । २४ ॥ (यथा, कुमारे । १ । ३४ ।
“सा राजहंसैरिव सन्नताङ्गी
गतेषु लीलाञ्चितविक्रमेषु ।
व्यनीयत प्रत्युपदेशलुब्धै-
रादित्सुभिर्नूपुरशिञ्जितानि ॥”)
कदम्बः । कलहंसः । नृपोत्तमः । इति मेदिनी ॥

राजहर्षणं, क्ली, (राजानमपि हर्षयतीति । हृष् + णिच् + ल्युः ।) तगरपुष्पम् । इति राजनिर्घण्टः ॥

राजहस्ती, [न्] पुं, (राज्ञो हस्ती ।) राजगजः । तत्पर्य्यायः । मारीचः २ याजकगजः ३ मदोत्कटः ४ । इति हारावली । ४६ ॥

राजहासकः, पुं, (राजानमपि हासयतीति । हस् + णिच् + ण्वुल् ।) मत्स्यविशेषः । तत्पर्य्यायः । कातरः २ कातलः ३ राजीवः ४ । इति शब्दरत्नावली ॥

राजक्षवकः, पुं, सर्षपः । इति राजनिर्घण्टः ॥ (अस्य शाकगुणाः ।
“संग्राहि शीतलञ्चापि लघुदोषाविरोधि च ।
राजक्षवकशाकन्तु सटीशाकन्तु तद्विधम् ॥”
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)

राजा, [न्] पुं, (राजते शोभते इति । राज् + “कनिन् युवृषितक्षिराजीति ।” उणा० १ । १५६ । इति कनिन् ।) प्रभुः । नृपतिः । (यथा-रघुः । ४ । ११ ।
“यथा प्रह्लादनात् चन्द्रः प्रतापात् तपनो यथा ।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात् ॥”)
क्षत्त्रियः । (यथा, मनुः । २ । ३२ ।
“शर्म्मवद्ब्राह्मणस्य स्यात् राज्ञो रक्षासमन्वितम् ।
वैश्यस्य पुष्टिसंयुक्तं शूद्रस्य प्रैष्यसंयुतम् ॥”)
चन्द्रः । यक्षः । इन्द्रः । इति मेदिनी ॥ उत्तरपदे चेत् श्रेष्ठार्थवाचकः ॥ अथ नृपतेः पर्य्यायः । राट् २ पार्थिवः ३ क्ष्माभृत् ४ नृपः ५ भूपः ६ महीक्षित् ७ । इत्यमरः ॥ नरपतिः ८ पार्थः ९ नृपतिः १० भूपालः ११ भूभृत् १२ महीपतिः १३ नाभिः १४ नाराट् १५ भूमीन्द्रः १६ नरेन्द्रः १७ नायकाधिपः १८ । इति शब्दरत्नावली ॥ प्रजेश्वरः १९ भूमिपः २० इनः २१ दण्डधरः २२ अवनीपतिः २३ स्कन्दः २४ स्कन्धः २५ भूभुक् २६ अर्थपतिः २७ । इति जटाधरः ॥ * ॥ अस्य व्युत्पत्तिर्यथा,—
“महता राजराज्येन पृथुर्वैण्यः प्रतापवान् ।
सोऽभिषिक्तो महातेजा विधिवद्धर्म्मकोविदैः ॥
पित्रापरञ्जितास्तस्य प्रजास्तेनानुरञ्जिताः ।
अनुरागात्ततस्तस्य नाम राजेत्यभाषत ॥”
इति विष्णुपुराणे १ अंशे १३ अध्यायः ॥
अपि च ।
“रागी राजसिकं स्वर्ग्यं कुरुते कर्म्म रागतः ।
रागान्धाश्च राजसिकास्तेन राजा प्रकीर्त्तितः ॥”
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्यायः ॥ * ॥
तस्य सर्व्वपितृत्वं यथा,—
शम्भुरुवाच ।
“शृणु वत्स ! महाराज हे तात ! भयभञ्जन ।
भयत्राता च राजा च सर्व्वेषां पालकः पिता ॥
भ्रष्टश्रीश्च महेन्द्रोऽद्य त्वञ्च स्वर्गे नृपोऽधुना ।
यो राजा स पिता पाता प्रजानामेष निश्चयः ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५९ अध्यायः ॥
पृथोरेवादौ राजा इति संज्ञा आसीत् । यथा,
“देवैर्विप्रैस्तथा सर्वैरभिषिक्तो महामनाः ।
राज्ञास्वेवाधिकारे वै पृथुर्वैण्यः प्रतापवान् ॥
तदा पित्रा प्रजाः सर्व्वाः कदा नैवानुरञ्जिताः ।
तेनानुरञ्जिताः सर्व्वाः सुखेम्मुमुदिरे तदा ।
अनुरागात्तस्य वीरस्य नाम राजेत्यभाषत ॥”
इति पाद्मे भूखण्डे २९ अध्यायः ॥ * ॥
अथ राजलक्षणम् ।
“सोऽपि कृष्णपटे बालं दृष्ट्वाशीविषपीड़ितम् ।
नरेन्द्रलक्षणोपेतं चिन्तामाप नरेश्वरः ॥
तस्यास्यं चन्द्रबिम्बाभं सुभ्रु रम्यं समुन्नसम् ।
नीलाः केशाः कुञ्चिताश्च समा दीर्घास्तरङ्गिताः ॥
राजीवनेत्रयुगलो बिम्बोष्ठपुटसंवृतः ।
चतुर्द्दंष्ट्रश्चतुष्किष्कुर्द्दीर्घास्यो दीर्घबाहुकः ॥
चतुर्लेखाकरो मास्ययवहेकपर्व्वकः ।
शिरालपादो गम्भीरः सूक्ष्मत्वक् त्रिवलीधरः ॥”
इति मार्कण्डेयपुराणे हरिश्चन्द्रोपाख्यानाध्यायः ॥ * ॥ अन्यच्च ।
“अस्वेदिनौ मृदुतरौ कमलोदरसन्निभौ ।
श्लिष्टाङ्गुली ताम्रनखौ पादावुष्णौ शिरोज्ज्वितौ ।
कूर्म्मोन्नतौ गूढ़गुल्फौ सुपार्ष्णी नृपतेः स्मृतौ ॥
मृदुलोमा समा जङ्घा तथा करिकरप्रभा ।
ऊरवो जानवस्तुल्या नृपस्योपचिताः स्मृताः ॥
कोषगूढ़े नृपो दीर्घैर्भुग्नैश्च धनवर्ज्जितः ।
समाभ्यां क्षितिपः प्रोक्तः प्रलम्बेन शताब्दवान् ॥
सशब्दनिःशब्दमूत्राः स्युर्द्दरिद्राश्च मानवाः ।